मानवेत्॥१५॥ तदा प्राणापहारी स्याद्राजयक्ष्मातिदारुणः॥ त्रिभिर्मासैश्चष(
ण्मासैर्वर्षैर्वापि त्रिभिः पुनः॥१६॥ शतमूलेरसप्रस्थ्य गुडूचीप्रस्थकल्कं लहरी
तकीसतान्पंचकुरजस्य त्वचस्तुलां॥१७॥ निःक्वाथ्य च पुनस्तेन पूतान्येकत्र मि
श्रयेत्॥ द्राक्षाद्याद्र्युपले पंच गुडानां शतपंचकं॥१८॥ तं च चूर्णं द्विगुणं त्वगेला
चित्रकं सटी॥ द्राक्षा कुष्टं शिलाजिच्च शिलाभेदं तु तालुकं॥१९॥ योज्यं तत्राक्ष १५४

मानेन भक्षयेत्सितसर्पिषा तस्योपरि पिबेत्क्षीरं भोजनं च तथोपरि॥२०॥ राज
यक्ष्मी लभेत्सौख्यं पांडुकामलकामयान्॥ अतिसारादिनाशः स्याद्वलेना
गवलो भवेत्॥२१॥ इत्यमितप्राशनावलेहः॥ वालकं च शिलाभेदं तथा चैव(
शिलाजतु॥ जीरके द्वे समंगा च कुष्टं नागवला वला॥२२॥ एला पत्रक ताली
सं तमालं हरिचंदनं॥ मुस्ता द्राक्षा च मुंडी च राम्ना शैलेयकं सुरा॥२३॥ सुरसा
चैव संयोज्यत्तिलान्क्ष्मान्द्विगुणांस्तथा॥ चूर्णं सूक्ष्मं प्रयुंजीत गुडेन मधु
नायुतं॥२४॥ पश्चाद्वो क्षीरपानं स्यात्क्षीरेण समभोजनं॥ राजयक्ष्मादिके(
क्षीणो ग्रहणीपीडितास्तथा॥२५॥ धातुक्षीणवलायेच तेषां संयोजयेद्भृशं॥
वृद्धोपि तरुणो भूत्वा नरो नार्याभिनंदति॥२६॥ वंध्यापि लभते पुत्रं षंढोपि
पुरुषायते॥ वालकाद्यमतकं नाम यक्ष्मात्रेयेन भाषितं॥२७॥ इति वलकाद्यं

आत्रे॰ मत्तं॥ गुडूचीच वलेद्वे च धात्री च मरीचानि च चूर्णं गुडेन संयुक्तं राजयक्ष्मापहं त्व

१५५ र्णं॥ शालिषष्टिकगोधूमं वास्तुकं जांगलानि च मुद्गाश्च गोपयश्चैव शशैणकुकु

टकाः॥ रुग्मी तित्तिरि क्रौंच लावकान॥ वार्त्ताकपिकछागादिमांसानि च प्रले

हकान्॥२०॥ भोजने क्षीरसर्पिश्च दत्तपेवा राजयक्ष्मणि॥ क्षाराम्लकटुकं तीक्ष्णं

तैलं सौवीरकं सुरा॥२१॥ राजिकावर्जिताश्चैते तत्पेवा राजयक्ष्मणि॥ इति क्षय

रोगचिकित्साध्याय॥ अथ रक्तपित्तं व्याख्यास्यतो॥ अतिघर्मे दीपाद्यात्तीक्ष्णो

ष्णकटुकाशनात्॥ क्षाराम्लसेवनात्स्वर्थं मद्यपानादिसेवनात्॥१॥ अतिव्यवा

यशीलेन मुष्कशाकादिसेवनात्॥ एतैस्तु कुपितं पित्तं रक्तेन सह मूर्छितं॥२॥

पुनस्तं संशयापन्नः पप्रच्छ पितरं सुतः॥ कथं पित्तं प्रकुपितं केन चापि प्रवर्तते

॥३॥ एवं पृष्टे महाचार्य्यः प्रोवाच मुनिपुंगवः॥ शृणु प्राज्ञ महातेजा श्चिकित्साग १५५

मशारद॥४॥ येनैवं कुपितं पित्तं रक्तं तेनैव कुप्यति॥ तावपि कुपितौ वायुर्वायुर्दारयते स्र

शा॥५॥ ऊर्ध्वं च नयते प्राणो अपाने पानमीरिता॥ मध्ये समानः कुरुते रक्तपित्तस्य कोप

नाधिरेवं हि॥ युगपत्पित्तं रक्तेन सह कुप्यति॥ चतुर्वा दृश्यते कोपो गतिस्त्वास्य द्विधा

मता॥६॥ ऊर्ध्वं श्लेष्मणि संसृष्टं गुदे वापि प्रवर्तते॥ तज्ज्ञाप्यं रक्तपित्तं तु कृच्छ्रेणैसि

द्धिमीप्सते॥ वाडमाप्यामय ऊर्ध्वं तु वातश्लेष्मनिवर्तते॥ तमसाध्यं विजानीया

त्कृच्छ्रेणापदि सिद्धति॥८॥ एकमार्गं वलवतो नाति वेगं नवोच्छ्रितं॥ रक्तपित्तं

सुखे काले साध्यं स्यान्निरुपद्रवं॥१०॥ एकदोषानुगं साध्यं द्विदोषं याप्यमुच्य

ते॥ असाध्यं च त्रिदोषोत्थं वर्तते रक्तपित्तकं॥११॥ ऊर्ध्वंगे रक्तपित्ते तु विरेककार

येत्सुधीः॥ अधोभागगते रक्ते त्तदास्रवमनं हितं॥१२॥ रोगक्षीणस्य विरविक

आत्रे. लेहीनदौर्बल्यकायेमंदाग्नौवातवथुवमनैः॥पांडुतादोषशोषैः तृष्णाछर्दिःश्वसन
१५६ मधत्तिर्मुक्तविद्वेषमोहौहृत्पीडाचभ्रमप्रमथमवेदुक्तपित्तोपसर्गाः॥१३॥अष्टादश
इमेप्रोक्ताःरक्तपित्तोपसर्गकाः॥उपद्रवैर्विनासाध्यःसाध्योनबहुपद्रवः॥१४॥र
क्तनिष्ठीवनोपेतंरक्तनेत्रभ्रमातुरं॥रक्तमूत्रंचवमतेरक्तमूत्रीनजीवति॥१५॥ए
वंप्रोक्तानिदानार्थाअतोवक्ष्यामिभेषजं॥सुखलक्षणसंयुक्तंरक्तपित्तंसुखाव
हं॥१६॥श्यामाहरणंभवतिपेनयुतंचवातात्स्निग्धंतुकफमथपीतकुसुमकामं॥पित्ते
नपित्तमितितंप्रवदंतिधीराः सांद्रंसपांडुरुजितमसघनंकफेन॥१७॥इतिरक्त
लक्षणानि॥क्षीणमांसंक्षतंवृद्धंबालंवाज्वरपीडितं॥शोषामूर्छाभ्रमापन्नमवि
रेच्यमुपाचरेत्॥१८॥निपीड्यवासारसमाददीतक्षौद्रेणखंडेनयुतंचपानं॥ना १५६

साश्चकर्णेनयनेप्रवृत्तंरक्तंतुशीघ्रंसमतांप्रयाति॥१९॥ वासाकषायोत्पलमृत्प्रियंगु
ह२ रोध्रांजनांभोरुहकेशराणि॥पीत्वासमध्वाससिताप्रदद्यात्सित्तास्रवेगंसमुदीर्णमा
शु॥२०॥प्रविद्यमानेनृचवासकेन॥कथंनरःवरःसीदतिरक्तपित्तात्क्षयेचकासे
दिम श्वसनेचयक्ष्मिणि॥वैद्याःकथंनातुरमाद्रंते॥२१॥भिषजोभिषजांमातांपुरस्क्र
संक्षपायपिकुर्वंतिरक्तपित्तेपित्तयेकासेचसिद्धदा॥२२॥वासायांविद्यमाना
यांमासापांजीवितस्यच॥रक्तपित्तीक्षयीकासीकिमर्थमवसीदति॥२३॥तालीशचू
र्णवृषपत्ररसेनयुक्तंपेयंसुसाध्यपुतंकफपित्तकासंहंति भ्रमश्वसनमा
श्रुतरंशिरोर्तिभंगंस्वरेत्वरितमाशुसखंधयुक्ताति॥२४॥आटरूषकमृद्वीका
पथ्याक्वाथःसशर्करः॥क्षौद्राढ्यःश्वसनंकासरक्तपित्तनिवारणः॥२५॥छागं

आत्रे. पयोवासुरभीपयो वा चतुर्गुणेनापि जलेन युक्तं ॥ सशर्करपानमिदं प्रशस्तं सरक्तपित्तं विनि
१५० हंति चाशु ॥२६॥ विलाह्य दंष्ट्रामलकीफलानां द्राक्षामधूकं मधुयष्टिकानां ॥ सिद्धं पयः
पानमिदं हितं स्यात् स्तिते सरक्ते मनुजस्य शांत्यै ॥२७॥ खदिरस्य प्रियंगूनां कोविदारस्य
शाल्मले ॥ पुष्पचूर्णं च मधुना लिह्यन्नारोग्यमश्नुते ॥२८॥ आटरूषकरसेन सप्त
धाभाविता च पुनरेव शोषिता ॥ पिप्पलीमधुसमन्विता भयारक्तपित्तमति दुर्जयं
जयेत् ॥२९॥ एलादलानित्वक्पद्मकनागकेशरद्राक्षाघनामधूकपिप्पलीकाः
समांशा ॥ एषां समांशितशर्करलेहयुक्ताः खर्जूरिका समनिहंति च रक्तपित्तं ॥३०॥
दाघज्वरार्तिश्वसनं च मोहतृष्णामूर्छां निहंति रुधिरस्रवमिंच येषां ॥ घ्राणोप्रवृ
त्तं रुधिरं यदि स्यात्तदा घृतेनामलकीफलानि ॥३१॥ तोयेन पिष्टा शिरसि प्रलेपः १५८

सरक्तपित्तं सहमाहरण ॥ द्राक्षारसो वा घृतशर्कराद्यो जलं सिताद्यं च सरक्तपित्ते ॥३२॥ पाने
यवाचेक्षुरसः सिताद्यः क्षयं च कासं च क्षतजं निहंति ॥ नस्यं विदध्याद्धरितालकाया र
सेन वापि ॥३३॥ स्याद्दाडिमस्य प्रसवोद्भवेन रसेन नस्यं रुधिरे स्रुते पि ॥ आम्रास्थिजं वृन्द
वशर्कराद्यो नस्यः सितोद्यो हितकृन्नराणां ॥३४॥ नासास्रवत्तं रुधिरं निहंति हिक्कां च छ
र्दिं श्वसनापमर्दि ॥ पलांडुपत्रनिर्यास नस्यं नासास्रगापहं ॥ षष्ठी मधुमधु युक्ता नस्ये
पित्तासृजं जयेत् ॥३५॥ वासापत्रैः संनिधाय मतिमान्योज्यानि चेमानि तु ॥ रोध्रं चोत्पल
मतिकासमधुकं कुष्ठं प्रियंगून्वितं ॥ चूर्णं पुष्परसेन पानकमिदं पित्तासृजानां हितं ॥ का
सं कामलपांडुरोगक्षतजश्वासोपमर्दी भवेत् ॥३६॥ धारसो हितो दाडिमपुष्पजश्च तथैव किं
जल्करसोत्पलस्य ॥ लाक्षारसेनाथ पयोनुनस्यात् घ्राणप्रवृत्तं रुधिरं निहंति ॥३७॥

आत्रे· इति नासाप्रवृत्तरुधिरचिकित्सा॥ यदि वदनपथेऽसृग्वर्त्तते तत्र कुर्यात्स्वतिविधि वि
१५८ हितास्याद्यस्तमेमानुषस्या भवति न सुखसाध्यं लोहितं मनुष्येषु॥ तदनुपुवर्त्ति योनौ
रक्तवाहं निहंति॥३९॥ मधुमधुरमुशीरं कांजिकं कल्कदूर्वारसमिह परिपूतं दाडिम
स्य प्रसूनं॥ आम्लयज सितं कुष्ठपद्मकं चैलवालं वच मधुकमधूकं वालकौशैसमं
ताता॥४०॥ समसुरभिपयोनुधावन तंडुलानां परिकरितसमग्रे तुर्यभागेन चाज्यं॥
लघुतरमपि वाहो धावितं सिद्धमेवं भवति वदनवृत्ते लोहितोपानमस्य॥४१॥ अमु
ति पथमपि रक्तं वा प्रवृत्तं तु नासाविहितमपि तदास्यास्पूरणं कर्णनासां॥ रुधिर
मपि रुणाद्धि कासमाप्नुत्तं वा म्वसनरुधिरछर्दिमोहनोन्मादहाहि॥४२॥ नासा
प्रवृत्ते नस्यस्यान्मुखे पानं विधीयते॥ कर्णनेत्रेः पूरणं च गुदमार्गे निरूहणं॥४३॥ दाडि १५८

मफलत्वग्जं वा चूर्णं लिह्यात्सितीयुतं॥ पद्मकिंजल्कचूर्णं वा लिहेद्वासितया पुनः॥४४॥ अ
मुखप्रवृत्तं रुधिरं रुंध्याच्चाम्र वमिक्तमीन॥ श्वासशोषौ भ्रमं तृष्णां नाशयंत्याश्च ऽ
संशयं॥४५॥ जंब्वाम्रपल्लवानि स्युर्हरीतक्या युतानि च॥ मधुशर्करया युक्तमास्यंलो
हितवारणं॥४६॥ वटप्रवालान्कुमसनीयजं वाम्रकानां खदिरस्य वापि॥ यथाप्रयत्नो
मधुनावलेह आसास्रजं वा रयते दृशोम॥४७॥ इति मुखप्रवृत्तरुधिरचिकित्सा॥ श
तवीर्या मधुकं वलावसुमतीकाकोलिकादाडिमं मेदेद्वीरचिदारिका च फलिनी
स्यात्रितिडीकं वला॥ सिद्धं गोपयसाज्यकं हितमिंद्पाने तथा वस्तिषु योनौ मेद्रगु
दप्रवृत्तरुधिरं हन्यात्सकासक्षयं॥४८॥ इति शतावरीघृतं॥ मधूकामधुकं विदा
रिवसुधा नीलीसमंगा फलु काकोली वहती युगं वषसहा मेदा सतं चंदनं॥ जातीप

आत्रे॰ त्त्वपटोलश्यामामृताजीवकौमेदाढ्यं मृगचंदनंमधुरसास्यामासमांशाशमीछिपात्त्वा
१५८ गोपयसावदन्धिलुलितवान्यंचतुर्थांशाकं॥मत्स्यंडीमधुरेवसिद्धिमित्तिचेत्यानंप्र
शस्तंन्दणां॥स्त्रीणांवापिहितंनिहंतिरुधिरंपित्तगुदेवामेवामेदेवापिचरोमकूपक
पथेवत्तंनिहंत्यसलक्तछिन्नाहत्नाद्यात्तोदिनामघृतमपिविहितंरक्तपित्तेज्वरेवावातास
ग्योनिमूलेमत्रमुमदाशिरसोन्माद्दरक्तप्रमेहे॥पित्तासृग्जातकुष्टेक्षयक्षतरुधिरे
राजयक्ष्मेपपांडौ॥पानेवस्तोचनस्येहितमपिमनुजेभाषितंचात्रिणाच॥५०॥ इ
तिद्राक्षादिघृतं॥छल्लीनिःकुष्पकूष्मांडखंडानिप्रतिकल्पयेत्॥कांजिकेनसुधौ
तानिपुनरेवजलेनतु॥५१॥पश्चात्क्षीरस्यप्रस्थेनकल्कयेत्पुनरेवच॥घृतेनपुनरे
वेतान्याचयेत्सुविधानतः॥५२॥यदामधुनिभानिस्युस्तदाशर्करयाशतं॥निधाय १५८

तत्रचेमानिमेषज्यानिप्रकल्पयेत्॥५३॥पिप्पलीश्रृंगवेराभ्यांद्वेपलेमरिचानि
चाजीरकेद्वेतथाधात्रीत्वगेलापत्रकंतथा॥५४॥पलार्धेनविमुंजीयाच्चूर्णीत
त्रविनिःक्षिपेत्॥दार्व्याविघट्टयेत्तावल्लेहीभूतंयदाभवेत्॥५५॥ततदाघृतेनोप
लिप्यात्स्थात्वातत्रबलाबलं॥रक्तपित्तक्षयंकासंकामलांतमकंभ्रमं॥५६॥छर्दितृष्णा
ज्वरश्वासपांडुरोगंक्षतक्षयान्॥अपस्मारंशिरोर्तिंचयोनिमूलंचदारुणं॥५७॥वि
रंयोनेरक्तवाहेमंदज्वरनिपिडितो॥वन्ध्यापुवायतेकामीवंध्याभवतिपुत्रिणी॥५८॥
अवीर्योवीर्यमाप्नोतिभवेत्स्त्रीणांप्रियोनरः॥श्वकूष्मांडकोलेहःसर्वरोगनि
वारणः॥५९॥इतिकूष्मांडावलेह॥सुखिन्नकूष्मांडकखंडकानिपलानिपंचा
शदतःसितायाः॥पुंज्याघृतेद्वेप्रतिधायमुत्त्या घृतेनप्रस्थंपरिभीतधीमा
न्॥६०॥विज्ञायपक्वंपुनरेवतत्रवासाकषायाद्कमिश्रयेच्चयश्वासचेपव
४मि॰

आत्रे. द्वींविलेपित्वात्वातु चेमानि च कर्षमात्रां॥६३॥ तस्मिन्पुनर्मरिचनागरधान्यका
१६० निचैषां पलस्य तुलितानां घृतमात्रा श्यामापलाष्टकमिदं विदधीत चूर्णं॥
संघट्टयेत्सकलमेव पुनस्तु दर्व्या युंजात्समं मधु घृतं सकलामयघ्नं कासं दत्तेन
मामपुनिहंति हिक्कां॥६४॥ आह्नोगपित्तरुधिरक्षयपीनसं च पित्ताम्लकं विनिहितं
श्वसनं च मूर्छां स्त्रीणां हितं भवति बालकवृद्धकेषु श्रेष्ठं समस्तरुजनाशबलप्र
दं च॥६५॥ आद्यस्य पर: कूष्मांडकावलेह शतावरीमुंडतिकावलाचामृतां त्वयं पुष्कर
मूलभार्गी॥ वर्षंवहस्यौ खदिरं च मौशली पथ्यव्यथकां च पलैकमात्रकां॥६६॥ पक्कं
तद्देत्तज्जलमष्टमांशं यावद्भवेछेषमथैव पूत्तां॥ विमूर्छितं तत्र निधाय धीमा
न्पलान्यथ द्वादशमाद्विकस्या॥६७॥ तथा सुचूर्णस्य च लोहकस्य विधादितं खंड
पलेन तुल्यां दत्वा पलान्षोडशकं विधिज्ञो विपाचये ल्लोहमये च पात्रे॥६८॥ गु १६०

डेन तुल्योपि विलातिपावतु गाविडंगं मगधा च शुंठी द्वे जीरके कर्कटकं फलानां त्रिगं
ध धान्यं मरिचं सकेशयां स्निग्धे कटाहे प्रणिधाय पुन्यते कर्षप्रमाणं विदधीत चू
र्णं॥६९॥ प्रभातकाले च सुदीरपानं गुरूणि चान्नानि सवातलानि॥ भगंदराशीः
श्वयथुन्निहंति पित्तात्मकं वा श्वसनं च यक्ष्मा॥७०॥ विशेषतः कुष्टरुजं च गुल्मा
न्बलप्रदं वृष्यतमं प्रदिष्ठा रक्तं सपित्तं सहसा निहंति योनिप्रवाहं च सरक्तमूलं
॥७१॥ रक्तातिसारं रुधिरप्रमेहं तथैं द्रवसौ निहितं निपणां॥ सौभाग्यदं कांति
करं प्रदिष्टं तेजोजपुष्टिं बलमातनोति॥७२॥ इति षडंगाद्य रसायनं॥ रक्तातिसा
रे रुधिरप्रवाहे समूलदाहे कफपाभिशांतिं सचंदनं मागधिका पटोलं विषा
समंगा मधुनावलेहः॥७३॥ तथा कुकीपत्रसमुत्सलं च तथा च धात्रीफलधात
कीनां॥ चूर्णं समस्तान्मधुना प्रयुक्तं लिह्यात्स रक्तातिप्रवाहके च॥७४॥ आत्त्वचो

आत्रे· मधूकमधुशाल्मलीनां पुष्पं तथा दाडिमधातकीनां चूर्णं विलिख्याद्रुधिराति
१६१ सारे योनिप्रवाहे सरुजि सदाहे ॥१३॥ फलत्रिकं शुंठिविषा समंगा सपर्पटं दाडिम
धातकीनां ॥ चूर्णं मधुशर्करया समेतं तथैव जग्ध्वा सघृतं च लेह्यं ॥१४॥ रक्ता
तिसारं रुधिरप्रमेहे योनिप्रवाहं सततं स्त्रियां च ॥ निवारयत्याशु हितं नराणां बा
लातिसारशमने सुयोज्यं ॥१५॥ इति रक्तातिसारचिकित्सा ॥ योनिः प्रवाहे मधुकं
समंगा पलाशदलं निंबदलानि पथ्या ॥ मुस्ता विशाला कटुरोहिणी च कल्को मधुश
र्करया युतो यं ॥१६॥ क्वाथो हितः शर्करया समध्वा योनिप्रवाहं विनिवारयेच्च ॥ इ
ति योनिप्रवाहचिकित्सा ॥ घर्मातपं तैलविदाहि नाम्लं सौवीरकं वा कटुकं कषा
यं क्षारं तु रावा परिवर्जनीया सरक्तपित्ते मनुजे हिताय ॥१७॥ यावास्तु कांचिल्ली सु
विषं च पुष्पं जीवंतिका वा शतपुष्पिका वा ॥ शाकाहिता रक्तभवे च पित्ते मुद्ग १६१

तथा लोहिततंडुलानां ॥१८॥ यवगोधूमचणकाः कोशातक्या पटोलकं ॥ मुद्गाश्च
माषाश्चैते पथ्या रक्तपित्ते निवारणे ॥१९॥ हरिणशशकलावतित्तिराणां कुलिंगाक्र
करमपि मधूकः क्रौंचपारावतानां पललमतिलपित्तं निवार्हेणां वै हितं चेम्न
वति बलममोघं सत्वतेजःप्रकाशं ॥२०॥ इति रक्तपित्तचिकित्साध्यायः ॥
अथातो वक्ष्यते पुत्र ह्यर्शसानां चिकित्सितं ॥ षड्विकारेण ये प्रोक्तास्ते बांभ
णाच लक्षणं ॥१॥ जातदोषैस्त्रिभिरपि वातपित्तकफादिकैः ॥ सान्निपाते चतु
र्थं स्यात्स्यं च मो रक्तसंभवः ॥२॥ षष्ठस्तु सहजो ज्ञेयो अर्शसां षड्विधो भवः ॥ ए
वं च षड्विकारेण जायंते गुदजा हृजः ॥३॥ अनशनलघुहृद्याहारसंसेवनेन क
टुलवणविदाहासेवया वातरोध्यात ॥ भवति सततविष्टा विषरेसौ वहीनः ॥ कु
पितपवनभावाच्चार्शसा भूत्तिशीतोता ॥४॥ अनाशनोपविष्टस्य मलमूत्राव

आत्रे· धारणोत्संप्रकुर्वंति गुदजाः शीतसंसेवनाद्दीप्त॥ ॥लवणकटुकषायतिक्तसंसेव
१६२ नेनामितलघुतरभोज्यशीलनात्तिरोघात् कुपितमनिलमार्गेष्वपानं वितर
ति रुधिरं वापानमार्गे मरुच्चा॥ धिकदम्ललवणोष्णतानिविदाहीनि गुरूणि च॥ से
नै४ वंनातितापेन श्रमाध्वयानपीडया॥ ॥मानव्यायामदोषाद्वा दुर्नाम भिन्नसंभवं॥
अव्यायामात्स्वप्नशीलाद्दज स्त्रं शीतां धौत्याद्यन्नसंसेवनाच्च॥ गौल्यात्स्म्ला तैलसं
पिछलेन दुर्नामैवं जायते श्लेष्मकोपात्॥ ॥शीतत्वतो दोषहर्षं विनिघ्नागुल्मो
दराष्ठीलविषूचिकावा॥ शोफो भवेत्कृष्मनखास्यनेत्रं लिंगानि वातप्रभवैशसा वा७
नां॥ ॥दाहभ्रमौ ज्वरपिपासशरीरतोदामूर्छारुचिर्नयनदंतमुखेषु पस्पापी
ताछविर्भवति वा विशिभेदकचापि तेन जाते गुदजे षितिलक्षणानि॥१७॥ निघ्रा
तिजाड्यघनसंदरुजाश्वशोफाः मूलातिगुल्मगदभंगुरकासतताः स्पुगावद्ध्व १६२

तोदमरुचिर्गतिमंदता च श्लेष्मोद्भवगुदरुजो रेवत द्भाः॥१७॥ मूलानाहोऽरुचिकासोदू
ल्लासोऽशीतत्तोदताः स्कंधयोर्जाड्यता सर्वे चार्शसस्तु स्युरूपद्रवाः॥१२॥ इत्यर्शसानां देह
लक्षणानि॥ अथ गुदजानां लक्षणानि वक्ष्यते॥ गुदे कंडूरसृक्स्रावो ग्लानास्यं चाति
रूक्षता॥ परुषा विषमाप्नीर्घा वातेन गुदजा विदुः॥१०॥ असदाद्याः सरुजः स्रावाः कंडूणो ३४
षश्च मारुतः॥ स्रवते सततं रक्तं सकद्धं ऽस्वग्भवार्श स॥१॥ धात्वान्यांकुरसमाकारेः
किमपः संभवंति हि॥ पवातत्समालिंगैर्गुदजाः संभवंति हि॥१५॥ वक्रास्तीक्ष्णाः
स्फुटितवदना दीर्घचिंचीफलाभाः॥ केचित्सिद्धार्थककणनिभाः कोलखर्जू
रकाभाः॥ कर्कंध्वाभांकुरलवसमाः केचिदंभोजबीजप्रायोऽपाने विदितगनु
जा संभवंत्यार्शसां हि॥१६॥ गुदेनापि केकणारंध्रे मुखे वा तथा वत्मनेत्रांतरे योनि
मध्ये॥ नराणां तथा शेफसोंते भवंत्येष रोगो न साध्यः सुखेन क्रियापत्नतास्याः॥१०॥

आत्रे· त्रिवलीगुदमध्येनुवाह्यतोंतेवलीतया॥ अर्शसां तुविज्ञानीयात्रीणिस्थानानि
१६३ चैवहि॥१८॥ वाह्यतः सुखसाध्याः स्युर्मध्येकष्टेन सिध्यति॥ असाध्यास्त्वं त्व
र्वलिजागुदजाभिषजांवर॥१९॥ प्रलेपवर्तिभिः स्वेदैर्वाह्याः सिध्यंतिचोत्तमः॥
यंत्रशस्त्रेणमध्यास्तु अंतर्जाश्चांतरौषधैः॥२०॥ तस्मात्सुत्रप्रयत्नेन क्रिया
कर्मविजानता॥ येनोनुरस्यरक्ताश्यायेनरोगोनिवर्तते॥२१॥ करचरणगुदेवाना
भिमेद्रमुखेवाभवंति हृदि पुंसां शोफशोषत्वरास्यश्वसनतमकछर्दिर्मो
हहृत्पार्श्वशूलं क्लशमहृचिविवंधश्चातिसारोपसर्गा॥२२॥ इति अर्शसामुद्र
वा॥ ज्वरारोचकेतृष्णार्तश्चातिरक्तप्रवाहणा॥ शूलशोफातिसारार्तोध्रुवंनोजी
वतेर्शसः॥ इत्यसाध्यलक्षणानि॥ अतोर्शसांप्रवक्ष्यामिक्रियाकर्मभिषग्वरो॥ वट
कात्क्षारशस्त्राणांयेनसंपद्यतेसुखं॥२३॥ अर्षसां तु त्रया। प्रोक्ता अर्शोघ्नावलवर्ध १६३

नाः पित्तशोणितसंशाम्नानचवातप्रकोपना॥२४॥ तस्मादौ पाचनं श्रेष्ठं ततो भेषजमा
चरेत्॥ पथ्यमतांतुधनिकाक्वाथः पानेगुडान्वितः॥२५॥ इतिपाचनक्वाथः॥ दंतीवि
डंगमगधानुधान्यमलातकानां तिलकुष्टयुक्तासंक्षुद्भितावै पयसापि कल्को
निहंतिपानेगुदजांस्तुरोगान्॥२६॥ इतिकल्कयोगः॥ नागरपिप्पलिचित्रविडंगंदं
तिसटीत्रिफलात्वचाच॥ कल्कमिदंसगुडंप्रतिपामेचार्शोविनाशनकारिनरा
णां॥२७॥ पत्रककेशरमुष्टिसमसेलातुंवरधान्यविडंगतिलानां॥ क्वाथोहरीतकीस
र्पिर्गुडेननिहंतिपीतोगुदजानशेषान्॥२८॥ पिप्पलिकामभयांगुडयुक्तांप्रातरु
मावपिमद्यतिवेद्यः॥ तस्यगुदेगुदकीलकमाशुहंतिसकामलपांडुहृगार्तिं॥२९॥
सुखिन्नवार्ताकफलस्यतोपंदग्ध्वाशताह्वांसलिलश्रुतेना॥ पानेविधेयंगु
दकीलकानांक्रिमीत्रिहंतिक्रिमिजांश्चरोगान्॥३०॥ मल्लातकाः क्रुष्णतिला

आत्रे॰ स्त्वपथ्याचूर्णं गुडेनापि नरस्य भोज्यं॥ हन्याद्यानेगुदकीलमेहमूलान्विनाशं
१६४ सि निहंति तस्य॥३१॥ इति भल्लातकचतुष्टयं॥ सूरणकंदकमर्कदलैस्तुवेष्टित
मेव कर्दमलिप्तं॥ मृत्स्नाष्ठगतानलवर्णसमानं तं च ससैंधवतैलविमिश्रं॥३२॥
भक्षितमर्शोविनाशनहेतु वातविकारहरं च नरस्य॥ चित्रपुष्करमूलसटी
नां तेषु समांशतिलान्वितियोज्य॥३३॥ सूरणकंदकखंडसमेतं तेषु समोग्निफ
लानि विदध्यात्॥ सैंधवमस्य चतुर्गणकं च भावितमर्कतलेन समस्तं॥३४॥
तं च घनस्य घटे विनिधाय॥ धारणपकगोमयवह्निविपक्वं क्षारमिदं लवणाम्
तपक्व तक्रानुपानमतो विनाशयति॥३५॥ हंति परं गुदकीलकमूलविसूचि
भगंदरमुदरं कामलपांडुमनाहविबंधं गुल्ममरोचकनाशनकारी॥३६॥
मूत्रगदामलगंड क्रिमीणां नाशनमद्भुतसैंधवनाम॥ इति कल्याणलवणं १६४

नाम क्षारं॥ त्रिकटुकमगधामूलचित्रं विगंधं समतुलितममीषां तुल्य भल्ला
तकानि सकलमिह समंतात्तेदकतः संप्रचूर्णाद्विगुणतुलितमात्रां योज <
नीयो गुडस्तु सकलमपि विकुर्याक्ष्निग्धभांडे निधाय॥३७॥ प्रतिदिनमपि
सेव्यं चाक्षमात्रं सुधीरैः॥ गुदजठररोगं मूलगुल्मान्क्रिमीस्तु जनयति व
3 ह्निवाग्निं हंति पांडुक्षयं वा॥३८॥ इति भल्लातकवटकाः॥ नागरं त्रिजफलां
चैव पलानि त्रीणि योजयेत्॥ चतुः पलं मरीचानां पिप्पलीनां शतद्वयं॥४०॥ प
लमेकं तु चव्यस्य योज्यं तत्र भिषग्वरः॥ तालीशार्धपलं देयं पलार्धपद्म <
कस्य च॥४१॥ जीरकस्य समामात्रा समेन तुलितो गुडः॥ सुपक्वा सघना रूपा
मा पिप्पलीनां शतत्रयं॥४२॥ उलूखले क्षोदयित्वा स्निग्धभांडे निधापये
त्॥ अक्षप्रमाणगुटिकां नराणां प्रातः प्रदद्यात् सकलामयघ्नी निहंति

इत्यादि
कृतान
सर्वानहि

आत्रे॰ चार्शांसि च पांडुरोगं हलीमकं च भ्रमकं तथा वमिं॥ ४३॥ गुल्मार्त्तिसारं च सरक्तपित्तं क्षयं
१६५ क्षतं च क्षयमस्य यक्ष्म॥ जीर्णज्वरारोचकपीनसानां हंता भवेत्प्राणदमोदकोयं॥
इति प्राणप्रदा गुटिका॥ जाती पिप्पलिमूलकोषणकणाकोलाग्निकं नागरं सूक्ष्मै
ला च पलद्वये पि क्रमशः कृत्वा पलं सैंधवं॥ भल्लातस्य पलानि पंच शतकं तेनैस
मस्तेन तु द्वे गुणेय नपुराण सूरणमतः सर्वस्य तुल्यो गुडः॥ ४५॥ द्वौ दित्वा वटकाद्द
मात्रमुपयुंजीत विशेषाद्गुणांकुर्वस्पर्शी निवार्य तत्क्षयमपि पुष्टिं नयेत्सुप्रभां मंदा
ग्निवडवासमं भ्रममयो हृद्रोगपांड्वामयं मूलानाहभगंदरोपशमनो दावर्त्तनि
१० नीशनी॥ ४६॥ गुटिका शैविकारैः ऋषिरणां योगयुक्तिनाकांकायनेनमतिमा त्ते
न सौख्यमभीप्सता॥ ४७॥ इति कांकायन गुटिका॥ लवणोत्तमवह्निकलिंगय
वाग्निरविल्वमहास्मिचुमंदयुता॥ पिवसप्तदिनं मथितालुलिता बद्दिमार्दितुमि १६५

छ्रीह पायुरुजः॥ ४८॥ इति लवणोत्तमाद्यं चूर्णं॥ विल्वोयकुस्ता मरिचानि केशरं पत्रं लवं
गैलकवह्निमानाता॥ चूर्णं हितं शर्करयुक्तमेतद्गुदामयानामुदरार्त्तिशांतये॥ ४९॥
इत्येलादिवटकः॥ सनागरं पुष्करवह्निदारुकं गुडेन यो मोदकमत्सु दारकां अशेषदु
र्नामकरोगदारकं करोति वह्निं सहसैव दारकं॥ ५०॥ इति चतुस्समोदकः॥ त्रिकटु
कमभयानां पुष्करं चित्रकानां क्रिमिरिपुतिलचूर्णं कारयत्तं गुडेन॥ उषसि वटक
मेकं भक्ष्यते यो मनुष्यो विनिहतगदजातं चाग्निवेद्धिं करोति॥ ५१॥ इति त्रिकटुका
मोदकः॥ मरिचं नागरं चित्रं सूरणभागोत्तरेण संकुर्ष्या सर्वसमो गुडयुक्तो मोद द्वि
कविंदुप्रमाणमेवैतत्॥ ५२॥ विनिहन्त सकलगुदामयजठरगुल्मान्निहंति भू
लानि लोहित पित्तविकारं क्षयपयतिमनुजं करोति तनु पुष्टिं॥ ५३॥ इति मरिचाद्यो
मोदकः॥ त्रिसमगत्तसूरणलोहितवर्णेन यो भवेन्मतिमान॥ खंडखंडीकृत्तमपि

५४ चैतस्मां पां मरिचदहनभागश्चैकभागेन शुंठी
सकलतुलितभागाः सरणा लक्ष्ममोपि। ५४। तदनुचविक
शुक्रा ५५

आत्रे· संमुष्ट्वा न्षोडशास्यवै भागान्॥ ५४॥ तस्यार्धेन तुलितं चित्रकमुंठी च तत्र संयोज्य।
१६६ मरिचस्य चैकभागो गुडेन वद्धस्तु मोदको मनुज्यैः॥ ५५॥ मर्दित एव हि गुणावा
न्निहंति सकलागुदामयास्त्वरितं॥ अग्नेर्दीपनमुक्तं गुल्मानाहं च जोठराहंति॥
५६॥ सूरणा चित्रकभागाः ८ मरिचभागः १ सूरणापिंडः॥ त्रिफलमगधजो
तं मूलं तालीशपत्रं क्रिमिरिपुमगधानां पुष्करं वत्सदारु एलाच भंगं क्षतमिह
परिपूर्ण द्वैगुणो जीर्णखंडः॥ कृतवरकमुषासु प्राशते यो मनुष्यो हरति जठररो
गं तस्यैचाप्युप्रकर्शः॥ ५७॥ गुदजरुधिरपित्तं कासमंदाग्निमूलाद्दयतमक
हलीमात्कामलानां क्रिमीणां॥ विदधति वलपुष्टिं दीपयेदाशु चाग्निं प्रव
लपतितु तांशं योगराजप्रसिद्धः॥ ५८॥ योगराजेन पुंजीत ह्वस्मरेणाप्यगीस्ति
ना॥ अस्य योगस्य योगेन भीमोपि वहुमद्दकः॥ ६०॥ इति भीमवटकः॥ चव्यपा १६६

ठात्रिकटुमगधामूलकुस्तुंवुरूणां विल्वांजाजीरजनि सुरसापथ्यपासैंधवं चपि
ष्ठा चैतत्समगधा विघृतं पाचयेत्सुप्रयुक्तया पानाभ्यंगे हरति गुदजान्वातरो
गोश्मरीश्च॥ ६१॥ इति च व्याद्यं घृतं॥ श्यामाकुष्टमधुकमदनारुष्करं चित्रकं
च विल्वदारुप्रतिविषताहाकलिंगशटीनां॥ पिष्ठा तैलं द्विगुणपयसा या
चितं चानुवासे चाभ्यंगे वा हरति मपि गुदव्याधिनिर्नाशहेतौ॥ ६२॥ वातव्या
धि श्रवणा वधिरेकर्णीमूले शमरीणां जंघा पृष्ठकटिन शिरसि वोवं द्वाणो
वात ता पेविषाबंधग्रहणि गुदजातिसारके मूढगर्भे प्रयेषं तैलं सकलानि
च पव्याधि संधारयेच्च॥ ६३॥ इति पिप्पल्याद्यं घृतं॥ विम्वामुस्तविडंगचित्रक
सटी पथ्या चंत्र जोवती दंती द्राक्ष वत्ता समांशाकपली मात्राचप्रत्येकशाः॥ त
स्माच्चाष्टपलान्यरुष्करमपि षद्रुकेदारोः पलान्यं मुंज्याष्टोडषसूरणास्य सालि

आत्रे. लद्रो रोखिलं कल्कितं ६४ पूतं भूयः पचेद्गुडं त्रिगुणितं मृद्वग्ना ॥ वे घा घनं सुद्धसे
१६० तत्सु नरेव चित्रकतत्व तेजोवती सूरणां ॥ एला पत्रक नागकेशर लवंगानां समं चू
र्णकमेषां षोडशभागया जिविहितं सर्वं तथा चैकशः ॥ ६५ ॥ स्थाप्यं स्निग्धघटे प्र
मातसमये भद्दये दत्तमात्रं वटं जीर्णे क्षीरमपि प्रमीतमतिमान्पाने तथा भोजने ॥
अर्शो गुल्म भगंदरान्ग्रहणी पांडुरोगो श्वकाम लामय मूलिनां ॥ विवंध कास द्व
तजं यत्माद्विहंति च ६६ ॥ इति भीमसेनो नाम वटकः ॥ भल्लातकानां द्विसहस्र
कानां द्रोणे जले पाच्य पदावशेषं ॥ क्वाथे तु तस्मिन्विपचेद्गुडस्य तुला प्रमाणं पु
नरेव तत्र ॥ ६७ भल्लातकानां च पुनः शतानि तत्रैव संयोज्य पलत्रिकं वा व्योष
जवानी घन सैंधवानां मेला लवंग दल वारणकेशराणां ॥ ६८ प्रत्येकं कर्षं तु
लितं विनियोज्य चैव संकुद्य तैल घृत भाजनेवा ॥ स्थाप्यं प्रभाते वटकप्रमाणं १६०

भक्ष्येद्रुणक्तं निहंति रोगान् ॥ भगंदरार्शः क्रिमिपांडु यक्ष्म गुल्माश्मरी मेह हली
मकं वा ॥ ६९ ॥ सरक्तपित्त ग्रहणी निहंति करोति पुष्टिं वलमातनोति ॥ इति भल्लात
कगुडः ॥ दशमूल गुडूची सटी द्रुतक सटे चित्रक भार्गि पलाशामितं प्रदद्देशत
पंचकं चाग्निमुखान्विपचेज्जले द्रोणमिते नत्वतः ॥ ७० गुडजी[illegible]शतं प्रदद्दे
त्क्वथितं त्ववतार्य मतिमान्सुशीतलकं दल केशर मंगल वंग युतं कृत चूर्णमिदं
सकलैकमिति ॥ ७१ घृतमावितमेक दिनं विदधीत भाजनके दिनसप्तम
कं स्निग्धघटे विदधीत मनुष्यदंतमिदं गुदजामयसंघे ॥ ७२ मूलमनाह
द्वे= विबंधक पि प्रतिमोदकमेक मुखासुयासन्विनिहंति गुदामयमेह हृजः क्रा
सहलीमक कामलकं हुतमेव हुताशनदीप्तिकरं ॥ ७३ इति भल्लातक गुडः ॥ योन
नरतिजले द्विगुणो जले नैव विलीयते लोलितो लोलतां याति चैकपाको विधीय

आत्रे. ते ॥७४॥ धात्र्यं व्यिकं चित्रकं मुस्ताचवकं त्रिफलामृता ॥ सहदेवीगजकणापामार्गंचकु
१६८ ठेरकं ॥७५॥ प्रत्येकं चतुष्पलिकान्कल्के द्रोणांमसासुधीः ॥ दत्तहलेसमेपुष्टेमल्ला
तक्याः फलानि तु ॥७६॥ पादावशेषे कल्के तु लोहचूर्णतुलार्धकं ॥ क्षिपेत्कुडवद
यं सर्पिः सर्वं चैकत्र पच्येत ॥७७॥ फलत्रिकं तथा व्योषं चित्रकं लवणाष्टकं ॥ विडं
गानि समांशानि सर्वाणि पलमात्रशः ॥७८॥ देयं गुदामये पांडौ कल्यमप्रातिरा
शने अर्शांसि ग्रहणीरोगं कामलां राजयक्ष्मिन ॥७९॥ गुल्मद्यपाश्मरीमूला
न्मंदाग्निं मेहशोणितं ॥ नाशयत्याशु यक्ष्माणां करोति बलमाकृतिं ॥८०॥ आपूर्व
ष्टिं चकुर्हतेवलीपलीतं नाशनं रसायनोपयोगेन नरो नागवलो भवेत् ॥८१॥ इ
ति मल्लातकावलेहः ॥ रक्तार्शसामुपचारं वक्ष्याभिभ्मणां मेषजं ॥ तिलांभुमत्तये
त्प्रातर्नवनीतेन मिश्रितान् ॥८२॥ सितानागरिकायुक्तं नवनीतं सकेशरं ॥ केश १६८

रं मातुलुंगस्य विडंगं शर्करायुतं ॥८३॥ मद्येकूष्मांडकालेहं नवनीतेन शर्करां ॥ एतेन
रक्तगुदजान्शमयंति विचक्षणाः ॥८४॥ समंगाशाल्मलीपुष्पं चंदनं कुमत्वचं ॥
नीलोत्पलमजाक्षीरं पिष्ठा पानमसृगादान् ॥८५॥ कुटजमूलस्य केशरमुत्सलं ख
दिरंयातकीमूलम्युक्तं पयः पिवति भक्षणात् योगस्सम्भवगुदजनाशनकार्यं विचा
रितं ॥८६॥ इति रक्तार्शश्चिकित्सा ॥ कुकुटस्य पुरीषं च तथा पारावतस्य च ॥ गृह
धूमं च सिद्धार्थं धत्तूरकदलानि च ॥८७॥ कांजिकं दकवर्ति विधानं त्वम्लरसेन
घृतेन च लिप्ता सर्वे भवंगुदकीलकमाशु नाशयते गुदजांश्च क्रिमिंस्तु ॥८८॥
इस्य पिवर्ति ॥ हरिद्रामार्कवं कुष्ठं गृहधूमं सुवर्चलं ॥ सिद्धार्थकरसं कांजिकेन स
पेषिताम्नशां ॥८९॥ मधुना संयुता वर्ति गुदे संचारिता निशं ॥ अर्शसां नाशनं कुर्या
द्गुदपाकं च शामयेत् ॥९०॥ इति परावर्तिः ॥ यंत्रशस्त्राग्निकं कर्मकथितं तंत्तु श

आत्रे. ल्सके॥ यथा यंत्रं छेददाहौ विधेयौ तन्न तत्र च॥ ९२॥ चर्मकीलं तथा छित्वा दहेत्क्षा
१६८ रेण घीयुत॥ पत्वा जंबूसमो चर्मः क्षारदाहे प्रशस्यते॥ ९३॥ दग्धं वा सूरणाद्वा
रं कदलीनीरमुष्कके॥ पलाशकोकिलक्षारमयामार्गघृतान्वितं॥ ९४॥ क्षार
दाघे प्रशस्तं तु नवनीतघृतेन वा॥ कुष्ठं पथ्यं तथा निंबपत्राणि समनःशिलाः
॥ ९५॥ तस्मात्मधु घृतं मिश्रं निर्धूमांगारके क्षिपेत्॥ धूपयेद्गुदजातेन यथासंप्र
यते सुखं॥ ९६॥ मनःशिलां सनागरां सगुलं ससर्षपां॥ सदेवदारुपौष्करं वि
शाल्य सार्जवैरसं॥ ९७॥ घृतेन धूपयेद्गुदं गुदामयं भगंदरं निहंति दुष्टपीन
सं व्रणं सपूयगंधकं॥ ९८॥ निर्गुंडी देवलानिंबपत्रैर्हरितालं सार्षपं चूर्णकं देवाहं घृ
तशर्करामधुयुतं धूपं भगंदरकोद्दुनीमे सरुजे व्रणे विषमये कुष्ठे विसर्पेषु चपा
मायीन सकासनाशने करं धूपं ग्रहोच्छेदनं॥ ९९॥ एवं क्रियाविधिः प्रोक्तः श्वातःप १६८

ष्याणि मे भृणु शालि षष्टिकमुद्गाश्च कुलत्थाढकि वास्तुका॥ १००॥ चिल्ली च शतपु
ष्पा च कूष्मांड कपटोलकं कारवेल्लं चतुंडीरं सूरणो राजिका॥ जीर्णकं॥ १०१॥ गुद्दूत कुघ
तं चैव प्रशस्तं तेर्मांसास दाकुकरः सल्लकी गोधा मूषको वा सरीसृपः॥ १०२॥ ला
वं तित्तिरवार्ताकमांसानि कथितानि तु॥ वल्लूरमत्स्य दधि पिच्छलतैल विल्ववार्त्ता
कभोजनमिति प्रतिवर्जनीयाः॥ निष्ठां कृतिं निशि दिवा शयनं च शीतं पानान्नमे
व परिवर्जितमादरेण॥ १०३॥ इत्यात्रेयभाषिते हारीतोत्तरे अर्शश्चिकित्साध्यायः
अथ वक्ष्यामि कासानां निदानं सचिकित्सितं॥ औषधान्न विहाराणि भृणु पु
त्र महामते॥ १॥ हास्यात्प्रहारस्वरजसा तथैव रोधाद्व्यायाम धूमक्षव वधोः प्रति
रोधनाच्च॥ पानान्न रूक्षविपर्यगत शीतसेव्यात्संजायते कृमिमनुजां प्रभवेत्तु का
सः॥ २॥ संसेवनान्मधुरपिच्छलजागराणां स्वप्नैर्दिवानि गुडगोल्य दधि स्तपान्यैः॥

मनुजं = २

आत्रे संजायते च दरतैलतघान्यकंदैर्मघेन वापि भवते जनं कफस्य ॥३॥ उदान ऊर्ध्व
१६० गतिवैपरीत्यात्कफेन प्राणानुगतेन दीर्घः हृदो निरेति कफवोत्सकंठे करोति
तेनापि च कास संज्ञा ॥४॥ कासश्वासौ समुद्दिष्टाद्धतज्ञोन्यः प्रकीर्तितः ॥ सप्त
मोलो हि तेनात्र अष्टमी जायते क्षयात् ॥५॥ वातिक पैत्तिकश्चैव श्लैष्मिकः सा
न्निपातिकः ॥ वातपित्तसमुद्भूतः श्लेष्मणाश्च समुद्भवः ॥ ध्र्नवातेन विना
श्वासः कासो न श्लेष्मणा विना ॥ न रक्तेन विना पित्तं न पित्तरहितः क्षयः ॥६॥
क्षयितः संभवश्चास्य अतो वक्ष्यामि लक्षणं ॥ येन संजायते नराणां कासश्चा
ष्टविधः परः ॥ चाक्षी रोग्द्रिपः पार्श्वरुजोति वेगः मूकावतो वा गलके च कं
डूः ॥ निद्राहृतिर्भिन्नस्वरो मनुष्यो वातेन कासस्य भवेत्प्रकाशः ॥७॥ इति वा
तेकासः ॥ करे विदाहो ज्वर शोषमूर्छा तृष्णा भ्रमः पित्तभवे च कासे ॥ अस्ये १६०

कटुत्वं च शिरोर्तिपानं निष्ठीवते पीतनखाक्षिनेत्रः ॥१०॥ इति पित्तकासः ॥ जाड्यं
वमिः पांडुभवश्च कासो निष्ठीवते यः सघनं कफं वा ॥ भक्तारुचि वीक कफपूर्ण
देहो घनस्वरः श्लेष्मभवे च कासे ॥११॥ इति श्लेष्मकासः ॥ कंडूदाहः श्वास
छर्दिः शोषारोचकपीडितः ॥ शिरोर्तिः शोफहृल्लासौ कासेष्वेषु त्रिदोष
जे ॥१२॥ इति त्रिदोषसंभवः कासः ॥ कंडूमांद्यं पिपासा च कुक्षिशूलं विनिद्र
ता ॥ शुष्ककासः पिपासार्त्तो वातपित्तोद्भवे कफः ॥१३॥ धूमगंधः पीतवर्णः
क्षिप्रपाकी सरक्तकः ॥ रक्तनेत्रः पिपासाढ्यः पित्तश्लेष्मान्वितः कफः ॥१४॥
व्यवायाश्च प्रसंगेन वेगपुद्धाभिघाततः ॥ भारोद्धारेण जातेन जायते क्ष
तजः कफः ॥१५॥ तेन हृद्दिव्यथा रूक्षा कासते च सशोणितं श्वासः संदीप
ते गात्रं दीनो मंदज्वरातुरः ॥ वेपते पर्वभेदश्च मंदज्वरनिपीडितः एवं क्षतज

दि

आत्रे॰ उद्दिष्टो नृणां प्राणापहारकः॥१८॥ इति क्षतजकासः॥ अत्यायासात्क्षतक्षीणात्स्तेनापाद्रूक्ष
१०१ भोजनात्॥ पवनाद्धातुयोगेन जायते रक्तजः कफः॥१९॥ विस्रगंधास्य हृच्छूलदीनोत्ति
विकलेंद्रियः॥ रक्तनिष्ठीवनोपेतः श्वासो वापि गदातुरः॥१९॥ क्षीयते सततं गात्रं मो
हस्तृष्णा च जायते॥ इत्येतैर्लक्षणैर्युक्तं रक्तकासं विनिर्दिशेत्॥२०॥ इति रक्तजकासः॥
क्षतक्षयानुमानेन लक्ष्यते कासलक्षणं॥ पांडुरोगे तथा यक्ष्मे गुल्मे वापि क्षतक्षये॥
२१॥ शोफार्शसां प्रतिश्याये चावश्यं कास संभव॥ एतेषां चानुमानेन कासः सं
लक्ष्यते भृशं॥२२॥ स्थविराणां जराकासः सोपि ज्ञाप्यः प्रकीर्तितः॥ बालानां जायते
कासो धातुवैकल्ययोगतः॥२३॥ एते कासाः समुद्दिष्टा दशधा भिषजोत्तमैः॥ ते
षां क्रियाप्रतीकारं पथ्यं भेषजमेव च॥२४॥ इति कासलक्षणानि॥ शतमूलिका
याः कथितः कषायः पिवेत्कणाचूर्णयुतं सुखोष्णं॥ नृणां निहन्यान्मरुतोद्भवं तु १०१

३

कासं सशूलं च विपाचनं स्यात्॥२५॥ भार्गीसटीगोक्षुरुशृंगवेरं शृंगीकणाचूर्णयुतो व
लेहः॥ गुडेन तैलेन हितो नराणां मरुद्भवकासविनाशनार्शः॥२६॥ विश्वस्य शृंगीस
टीपुष्करं दारु भार्गी कणामुस्तरास्नायुतं शर्करायुक्तमनुदिनं चूर्णितं हंति वातोद्भ
वं श्वासकासं प्रसूतं॥२७॥ इति वातोद्भवकासचिकित्सा॥ कट्फलं कत्तृणं भार्गी मुस्ता
वचा धान्यकं पर्पटं देवदारु पथ्यादि विश्वायुतं कर्कटकल्कं येत्स्यान्मेतन्मधुसं
युतं मानवकासिनां कासमाशु प्रतीहारकं॥ इति कट्फलादिक्वाथः॥ द्राक्षामलकप्रु
सलपिप्पलीनां कोलं च खर्जूरयुतो वलेहः॥ सपित्तकासक्षयनाशकारी सकाम
लं पांडुहलीमकं च॥२९॥ बलावहस्तो मधुकं वयं च तथैव कुष्ठं पिचमर्दकं च॥ गवा
क्षनी संयुतकल्कमेतत्स्यानं हितं पित्तकफात्मके च॥३०॥ मुस्ताटरूषकफलत्रिक

आत्रे· दारुभार्गीव्याघ्रीसपुष्पफलमूलदलैरुपेतारास्नाविषामधुरसा दलानिचूर्णानिहं
१८२ तिक्वथितेनजलेनकासं॥३१॥वक्राथवापिगुटिकामधुनागुडेनसिंधूद्भवेनमगधा
समहौषधेन॥अस्यैघ्नतानिशिविशालगुणाभवंतिश्वासंक्षयंचक्षतजेकासनिहंति
चाशु॥३२॥इतिमुस्तादिचूर्णं॥शर्कराचैवखर्जूरंद्राक्षालाजाकणामधुसर्पिर्युतोहि
तोलेहः पित्तकासनिवारणः॥३३॥इतिपित्तकासचिकित्सा॥आटरूषकपत्राणिपिचु
मंदर्दलानिच॥तुलसीपत्ररसंचैषांभृंगीमरिचचूर्णकं॥३४॥भुंटीगुडयुतंलिह्यात्का
सेवातकफात्मके॥स्याटरूषाद्यंचूर्णं॥भार्गीनागरपिप्पल्यः पिबेत्क्वाथंसुखोष्णकं॥
कफकासेप्रतिश्यायेश्वासेहृद्रोगसंस्थिते॥३५॥आर्द्रकस्यरसंचैवमधुनाचसं
मन्वितं॥कासेश्वासेप्रतिश्यायेज्वरेश्लेष्मसमुद्भवे॥३६॥कट्फलंकतृणंभार्गीमु १८२

स्तंभृंगीवचाभया॥शुंटीपर्पटकंचैवसुराह्वंचजलेशृतं॥३७॥मधुनासंयुतंपानंका
सेवातकफात्मके॥श्वासेहिक्काज्वरेशोषेमहाकासेचदारुणे॥३८॥इतिकफकास
चिकित्सा॥तालीसपत्रंमरिचंसविश्वाश्यामायुतंचोत्तरभागवृद्ध्या॥त्वक्पत्रके
नापिलवंगमेलापिप्पल्यथार्धोगुणितासिताच॥३९॥लिह्यात्क्रमात्तेश्वसने
चकासेप्लीहेऽरुचौपीनसछर्दिहिक्का॥शोफातिसारग्रहणीचपांडुक्षयंनिहं
तिक्षतजंचयक्ष्मा॥४०॥इतिलघुतालीसाद्यंचूर्णं॥तालीसंत्रिफलाप्रियंगुमग
धामूलंचमुस्तासटीपाठैलादलकेशरंलवंगास्तेयानागरंक्रघ्नाकोलकवा
लकंचैरजनीमूर्वाविषाकर्कटद्राक्षाकुष्ठनिशाग्निवत्सकवचंगोक्षुरतिक्ता
सया॥४१॥वक्राम्लंचसदाडिमांम्लकरसंपक्वान्यथोवादरणपेतेपासममाग

आत्रे· चूर्णं विहितं योज्यासमशर्करा॥ भोज्यं चार्धपलं निहंति क्षतजं कासं तथोच्छ्वासकं पां
१७३ डुं कोद्वामलमेदाशोषगुल्मजान्छस्तं सदायद्विमूर्णां॥४३॥ इति तालीसाद्यं चूर्णं॥ क्ष
तकासादिहरं मधुयष्टि। कयालाक्षाशताह्वाकर्कटशृंग्यं॥ द्राक्षाशतावरी चैव वृद्धि
गुणा वंशलोचना॥४४॥ सितासर्वसमायोज्यायुक्तं च मधुसर्पिषा॥ हन्ति कासे रक्तपि
त्ते राजयक्ष्मिणि पीनसे॥४५॥ धवार्जुनकदंबानां जंबाम्रत्वक्ततत्समं॥ मनःशि
ला च कासीसं क्वाथं कृत्वा ससैंधवं॥४६॥ गुडेन सर्पिषा युक्तं हंति कासं क्षतोद्भवं॥ आ
टरूषमयामार्गरसं वा क्षतकासिनां॥४७॥ ककर्कराहुं तथा मुंडी पक्वं च बृहती फलं॥
घृतमाक्षिकसंयुक्तं हंति कासं क्षतोद्भवं॥४८॥ अथ कासप्रतीकारे वमनं वक्ष्यते
धुना॥ वचासैंधवतोयेन वमनं वातकासिनां॥४९॥ दशमूलजलं वापि सैंधवेन यु १७३

तं पिबेत्॥ वमनं वातकासानां नाशनं कंठशोधनं॥५०॥ स्वरे पटुत्वं भवति वांतो नि
रवशेषिते॥ आकंठं पाययेद्दुग्धं वमनार्थं ततः पुनः॥५१॥ देवदालीजलं क्षौद्रस्व
ल्पं पीत्वा तु वामयेत्॥ मदनक्वाथं पिबेद्वापि वमनार्थे विचक्षणः॥५२॥ निरवशे
षे तु वमिते पिबेत्क्षीरं सुशीतलं॥ इति पैत्तिकस्य वमनं॥ अंकोलकस्य मूलं चापि
ष्ट्वा चोष्णेन वारिणा॥ वमनार्थं पिबेच्छीघ्रं वामयति मानवं॥५३॥ तुंडुलीय
कमूलं वापि पिबेदुष्णेन वारिणा॥ वमनं जायते तेन कटुतुंबीजलेन वा॥५४॥ देव
दालीफलजलं पिबेत्स्वल्पं सशर्करं॥ तेन वामयते शीघ्रं कफकासमुद्भवे॥
५४॥ निरवशेषे च वमति पयःपानं विधीयते॥ यदि श्लेष्मोदो नोपशमेत्तदाद्या
त्सशर्करं॥५५॥ वमनान्तरतो भद्रे त्र्यष्यांस गुडनागरं॥ वातकासविनाशाय

आत्रे भृंगीवापि गुडान्विता॥५६॥ इति वमनानि॥ आमलक्याः फलं द्राक्षामधुशर्करया
१०४ युतं॥ पित्तकासविनाशाय पुराप्रोक्ता विधीयका॥५७॥ आटरूषरसं मूत्रं तथा कु
टजमूलकं॥ सौभाञ्जनकमूलस्य रसं वा मरिचान्वितं॥५८॥ आमलक्या फलं द्रा
क्षासमेन गुडसर्पिषा॥ युतं मेध्याग्निना पक्वं लेहः कासे कफोद्भवे॥५९॥ मनःशि
लासमालिप्तं वदरीदलान्यातपे॥ शोषितानि पयः पिष्टं पानं मधुसमन्वितं॥६०॥
एष हंति महाकासश्वासं चापि सुदारुणं॥ कर्षमेकं मरीचस्य कर्षार्धं पिप्पली
मता॥ पलं च दाडिमं योज्यं निर्गुंडीनां पलद्वयं॥६१॥ योज्यं तथा कर्षं तु संयोज्य दि
यावसूकजं॥ चूर्णं चोष्णजलानुपानं योज्यं भिषग्मतिमन्॥६२॥ ये रोषधैरसा
ध्या ये वै बहुरूपे क्षिताः कासाः॥ यूयं वापि वमंति तेषामिदमौषधं श्रेष्ठं॥६३॥ विभी १०४

तकं घृते भृष्टं चूर्णीकृत्वा भिषग्वरः॥ भावितं चाटरूषस्य दलानां च रसेन वा॥६४॥ वे
ष्टितं चार्कपत्रेस्तु कर्दमेन तु लेपयेत्॥ स्विन्नमग्नौ मुखे धार्यं कासं नाशयते
ध्रुवं॥६५॥ पुष्कराह्वा सटी बिल्वं सुरसा व्योषहिंगुभिः॥ पायः पानं च तप्तं च कासे
वातकफात्मके॥६६॥ पंचांगश्चैव कंटकार्याः सुरसांगद्याटकं पुनः॥ घृतप्रस्थं
समायोज्य तथा क्वाथश्चतुर्दसतो॥६७॥ सटी विडंग बिल्वानि व्योषं पथ्या सदाडि
मं च भृंग कालीव हस्यो द्वे पोष्करं यावसूकजं॥६८॥ दुरालभा वचा द्राक्षा पथ्वी
काचाम्लवेतसं॥ संस्नागो द्रसहकं भार्गी भृंगी दारुयुतं तथा॥६९॥ कल्कं पादा
वशेषं च घृतं तु लसं विपाचयेत्॥ कासे श्वासे प्रतीश्यायेके कफव्याधौ प्रशस्यते
॥७०॥ पाने नसहितं चैतुत्सवं श्लेष्मगदापहं॥ इति वहत्कंटकारीघृतं॥ जीवक
र्षभकौ मेदा काकोल्यौ मधुकं सह॥ जीवंती जीवनी पाचमधुरौ जीवको गणः॥

आत्रे· ॥७०॥ अथ धूमपानं॥ मनःशिला सकासीसं व्योषं मांसी सुराह्वयां गंधकं निंबपत्रं च निर्गुंडी
१०५ सुरदारु च॥०॥ आगुडसर्पिः समं लिप्तं निर्धूमांगारकोपरि॥ चटकर्परकं देयं तस्य छिद्रं
तु कारयेत्॥०॥ आत्तेन छिद्रेण तं धूमं नाडियंत्रेणायापयेत्॥ अर्कदलं मनःशिलां तु
ल्यं ततो धेकटुकीत्रिकां॥७५॥ चूर्णं निर्धूमांगारक्षिप्तं पूर्ववत्सापयेद्धूमं॥७६॥ तं निहंति
कासं जीर्णान्दरोगांश्च विरकालोत्थां॥७७॥ अथ वाचरणीकानां त्वाखवर्तिं विकटुकघृतम
लिपा धुद्दिमां पिवेद्धूमं॥ इति धूमपानविधिः॥ जीर्णतंदुलकान्नं तु सर्पिः सैंधवकं तथा॥
सामुद्गलवणां चैव पुत्तं पथ्यं च कासिनां॥०॥ चाकुलत्थाटकीमुद्गानां यूषः शस्तो भि
षग्वरः शतपुष्पा कासमर्द तंडुलीयकमेव च॥७९॥ आग्रंगारमबस्मांसानि जांगलानि
मतानि च॥ न दिवास्वपनं कुर्यान्न कुर्यात्तैलभोजनं॥ न नक्तं दधि भुंजीत न सेवच्चा
तिशीतलं॥८०॥ इत्यात्रेयभाषिते हारीतोत्तरे कासचिकित्साध्यायः॥ [illegible]त्वातिशी १०५
रू

तत्वविरुद्धाहिविभोजनैर्वा व्यायामभारपथिवेगगतेर्नरस्य॥ तत्र घ्यातिभोजनमथातिर
तिप्रसंगाद्धिक्कान्वितस्य स्वपनं भवने नरस्य॥१॥ तीव्रेज्वरे त्सशनद्दीणगात्तेस्तु मंद
प्राणास्य ये भवति वा चलिते क्षुधाने सा पंचधा निगदितायमला च क्षुद्रा गंभीर
काथमहतीति भवंति पंच॥२॥ सहसाहारपानेन मध्ये संकुचितोनिलः॥ ऊर्ध्वमु
द्गिरते वायुस्तेन चाहारजा स्मृता॥३॥ इत्याहारजा हिक्का॥ चिरं छिद्यत्वातिवेगेन कंपयं
ति शिरोगलं॥ युग्मके न भवेंघात्ते सा युग्मेत्यभिधीयते॥४॥ इति यमलानाम हिक्का॥
हृदयाग्निन्निर्गतायामंदेनापि प्रवर्तते॥ सा च क्षुद्रभवेद्धिक्का याचर्ममेनवाध
ते॥५॥ इति क्षुद्रानाम हिक्का॥ नाभेः समुत्थिता या च श्वासेन सह धावति॥ गंभी
रनादिनी या च गंभीरा वहु उपद्रवा॥६॥ इति गंभीरानाम हिक्का॥ सम्मूलो घ्यासस्यमु

आत्रे. क्का संपीडतिमर्माणि ॥ उच्छ्रोलवक्रात्रकंपः सामहतीतिगीयते ॥४॥ इतिमहतीनामहिक्का
१०६ आहारजायमलजा साध्ये द्वे भिषजां वरः गंभीराकष्टसाध्यास्याद् असाध्यां महती
विदुः ॥५॥ आहारजायां वमनं कुर्याद्वास्वपनं सुधीः ॥६॥ येवीभत्सकं वापि सिद्धयेत
सोनरोत्तमः ॥७॥ यामजायाम् वेहिक्का तस्यां क्षीरं तु पाययेत् ॥ वमनं वाप्रशस्तं ।
स्यान्नास्वस्थेवनं हितं ॥८॥ कोलास्थिमज्जाञ्जनलाजकानां भूनिंच कृष्णामल
कीफलानां ॥ विश्वौषधं वा क्वथितं सिताढ्यं पानं च हिक्काशमनाय हेतोः ॥१०॥ प
टोलानां फलं वापि खर्जूरी मुस्तकं तथा ॥ लेहो हिक्काविनाशाय हितो यं मधुनायु
तः ॥११॥ मधुकं मधु संयुक्तं हिक्काश्वासनिवारणं ॥ स्तन्येन वा लोहितचंदनेन दु
ग्धेन वा नागरमाक्षिकं च ॥ क्षारेण वालक्तरसः प्रयोज्यः पानेन हिक्कां जयतेरज १०६

स्या ॥१२॥ बीजपूररसं संगृहीत्वा पथ्यासिताभ्यां मधुना युक्तं च ॥ पानेन हिक्काः शम
येच्च मोहभ्रमं चेकासं श्वसनं निहन्यात् ॥१३॥ भृंगीशिवामागधिकाथवापिक्षुल्ला
मलक्यासहभ्रंगवेरं चूर्णोषितां क्षौद्रयुतो वलेहो हिक्काविनाशनपरस्पशी
घ्रं ॥१४॥ वारंवारं योजयेल्लेहपानं हिक्काशांतिर्दृश्यते यावदेवाचांते ऐधं वर्जयेत्सि
चयेच्च वीभत्सं वा कौतुकं वा प्रदर्शितं ॥१६॥ एतैः शांतिर्दृश्यते वामनुष्येनाम्ने हृ
र्ध्वं वंधयेद्दृढ्छेन ॥ वस्त्रौमर्दः स्वेदपेद्या मनुष्यमेते वापि दृश्यते शांतिहेतु ॥१७॥
द्योतजं शस्त्रनिर्भिन्नं व्याध्यतीसारपीडितं ॥ अतिव्यवायनं चापि हिक्कार्तं दूरत
स्त्यजेत् ॥१८॥ इत्यात्रेयभाषिते हारीतोत्तरे हिक्काचिकित्साध्यायः ॥ अथवायशीताद्यैश
नातिसाररसंरोधनाद्वापि तथान्यैः श्वसना ॥ ते पंचधा भेदविभिन्नरूपं वक्ष्यामि तेषां
मणुलक्षणानि ॥ महाश्वासश्चोर्ध्वश्वासश्छिन्नश्वासस्तथापरः ॥ तमः क्षुद्रक

आत्रे॰ श्चैव श्वासः पंचविधः स्मृतः॥१॥ संरुध्य मार्गं कफवातधात्वं तरंगस्य समानमूलं॥३॥ दा॰
१७० नयोगाद्बलवान्निरेति प्रणो वलीयान्नयने तथोर्द्ध्वं॥३॥ उद्धूयमानः शब्दं च करोति विव
र्त्तनेत्रो॥ विवर्त्तास्यता च दीनो विनष्टो गतमोहचेता॥४॥ आत्र्या धोपते वापि महाश्वासः स्मृत॥
इति महाश्वास॥५॥ ऊर्द्ध्वं श्वसन्दीर्घनं चीन्नतास्योन चैवदीनो निकफावतश्चास्रो तांसि
संरुध्याति भ्रांतिनेत्रस्तमूर्द्ध्वकश्वासविदुर्मुनीद्रा॥ स्योद्धृतनेत्र श्छिन्नः श्व॰ श्व॥
सतियो नरः॥ दाहमूर्च्छात षापन्नो वदतीऽत्पते पुनः॥७॥ खस्यानेनोलयं याति छिन्न
श्वासो नरस्तु एतेत्रयेप्यसाध्याः स्युर्महाश्वासस्तयोर्द्ध्वगः॥८॥ छिन्नश्वासस्तथा
न्योपि नरः प्राणान्जहाति च महात्मा प्रयत्नश्च प्रतीप्यति विनिद्रुता॥ वशयने चासने
वापि सुखं वै शीतले भवेत्॥ प्रभु क्षालालावमत्तोललाटस्वेदमा प्रवान॥१०॥ उद्धृताद्धो
भवेद्दीनस्तमः कष्टेन सिद्ध्यति॥११॥ त्रासात्क्रोधाति तमसः शीतवातात्तपाद्विषुज्व १७०

धा॰ त्र३

रेणा वेदनार्त्तो पिजलेमज्जंस्तथा पुन॥१२॥ दाहात्प्रधावनेनापि रुक्षाच्चात्स्पर्शनादपि क्रो
धेमिथ्दीर्घुतेवायुस्तेन च दुःप्रजायते॥१३॥ श्वासेवा नागरा भार्गी पिबेच्चोष्णेन वारिणा॥
अथवा शर्करायुक्तं जपेच्छ्वासं सुदारुणं॥१४॥ भार्गीफलत्रिककटुं पुष्करारव्यं मांसी स २
विश्वलवणानि च कंटकार्यां॥ चूर्णं जलेन क्वथितेन जयेतु हिक्कां श्वासं च यदि द्विविध॰
कासविनाशकारि॥१५॥ एलातमालदलनागरवालकाद्वि पिप्पलीभार्गीसुरसारि
चंदनानि चूर्णं सिताधिकमितं पिवशीततोयैः श्वासोर्द्ध्वकं तमकमेव निहंति चा
श्मु॥१६॥ गुडूचीनागरं भार्गी व्याघ्री क्वाथः कणायुतः॥ श्वासकासौ जयत्याशु सें
धवेन गुडेन च॥१७॥ हरीतकीस नागरं पिबेत्सुखोष्णवारिणा॥ निहंति श्वासका
सकौ जयेच्च कामलामयं॥१८॥ गुडेनसंयुतं देयं तैलं सार्षपसंभवं॥ एकविंशाहयोगे
न श्वासमूलानि कृन्तति॥१९॥ हिस्रात्रिगंधक्रिमिशत्रुकरंजकानां व्योषफलत्रिक

आत्रे· मथ्यजपयोजलेनापक्वंचपाचकविधानमतिप्रशस्तंश्वासंचपंचविधमाशुनिहि
१०८ तिहिक्कां॥१॥तिहिंस्त्रायंघृतांभार्गीचशुंठीदशमूलसमाचपथ्यापादावशेषितजले
नपरिस्रुतेन॥द्विप्लागुडंचपुनरेवततोभयाः संचूर्णितत्रपुनरेवावियोजितानि॥२॥
उत्तार्यशीतलमतश्चसुगंधकानिसत्रूषणानिसयवाग्रजसंयुतानिलिह्यात्सुसा
रघयुतोप्यभयान्वतोपिसंहारणाः श्वसनकासकरोगजानां॥२॥श्वासेनविदले
सेव्यंसुशीतंनविदाहिंच ज्वरेप्रोक्तानिपथ्यानिकासेप्रोक्तानितानितु॥२४॥ इ
त्यात्रेयभाषितेहारीतोत्तरेश्वासचिकित्सानामाध्याय॥अथस्वरभाषोध्यायात्क
फाद्याशीतसेवनात्तामार्गनिरुध्यतेश्लेष्मातस्मात्तंबाधतेस्वरः॥सोपिचषड्विधः
प्रोक्तः स्वरघातात्समीरणात्॥वातात्पित्ताच्छ्लेष्मणश्चसन्निपातात्तथाक्षयात्॥१॥वा
तेनाक्तघ्मदुग्धेनघराबाविदीर्यतो॥पित्तेनकंकरावः स्यात्सीतविण्मूत्रनेत्रता॥३॥१०४॥

ह्नि

श्लेष्मिकेघुर्घुरायेतव्यापामेतकफातुरः॥समानः सर्वलिंगैस्तुजायतेसान्निपाति
क॥४॥क्षयोद्भवोघर्घररावस्तुकफः पततिपिच्छिलः॥कफजेमूलहृद्रोगीबर्बरः श्वसते
तथा॥५॥इतिलक्षणविज्ञानमतोवक्ष्यामिभेषजं॥वमनंलंघनंचैववपानंलेपानंनस्यं
विरेचनंबुध॥वातपित्तकफात्साध्याद्वंद्वकृच्छ्रेणसिध्यति॥असाध्यः सन्निपातोत्थः
क्षतजः क्षयजस्तथा॥६॥जवानीशृंगवेरश्चकाथः कोष्णंपिवेज्जलं॥सनागरपि
प्पलिमूलरास्नाचचाकणा॥दार्हलेनकल्क॥सुखोष्णपानंक्वथितंनिशासुस्वरोप
घातेनिलजेशमाय॥७॥स्वरोपघातेनिलजेभुक्तोपरिघृतंपिवेत्॥गुडंलंवागुडसंयुक्तं
शृंगवेररसान्वितं॥८॥इतिवातकस्वरोपघातचिकित्सा॥क्षीरपानंनिशिरास्तक्को
ष्णंवाशर्करान्वितंगुडः पथ्यः समरिचंयानेचापिप्रशस्यते॥१०॥कुष्टंमधूकंचहिकंटका
रीगुडूचिकावालंक्रकल्कमेवं॥सशर्करंपानमिदंप्रशस्तंपित्तप्रभूतस्वरघातशांत्यै॥

आत्रे॰ ११॥ इति पित्तस्वरोपघातचिकित्सा॥ पिप्पलीमरिचविश्वापिप्पलीमूलमेव च पिबे
१०८ न्मूत्रेण वा कल्कं श्लेष्मभूतस्वरापहो॥१२॥ कुलुत्थाढकियूषं वा घृतसैंधवसंयुतं॥
स्वरोपघाते कफजे पिबेदुष्णोदकं निशि॥१३॥ व्याघ्रीफलं च कुटजं मरिचानि शुंठी
रात्री छिंपेत्सुरतरोर्विहितश्च कल्कः। पानं हितं निशि सुखोष्णमिदं नराणां श्लेष्मो
द्भवस्वरविघातविनाशहेतोः॥१४॥ इति श्लेष्मजस्वरोपघातचिकित्सा॥ चव्याम्लवे
तसकटुत्रिकतिंतिडीकतालीशजीरकतुगादहनैः समांशैः॥ चूर्णं गुडप्रमुदितं त्रिसु
गंधयुक्तं वैस्वर्यपीनसकफारुचिषु प्रशस्तं॥१५॥ वदरीपत्रकल्कं वा घृतभृष्टं ससैंधवं॥
स्वरोपघाते मनुजे लेह एषः प्रशस्यते॥१६॥ स्वरोपघातं क्षतजं क्षयजं वा भिषग्वरः प्रसा
ध्यायुक्तियाकार्यो नराणां कष्टनिवर्तये॥१७॥ इत्यात्रेयभाषिते हारीतोत्तरे स्वरोपघात
चिकित्साध्यायः॥ भोजनादौ पयःपानादजीर्णात् क्रिमिदोषतः॥ अतिमुक्तेरसैः स्नि १०८

ग्धैः रूक्षैर्वा लवणादिभिः॥१॥ तथा गर्भवतीनां च द्रुतं भोजनकेन च॥ भयश्रमे शोकगुल्मे वा
क्षते व्यायामसेचनात्॥२॥ जायंते बलिनो दोषा आस्ये धावंति चोर्ध्वतः॥ पंच धा लक्ष
णैर्भेदाः ख्याता निश्चितात्मकाः त्रयः॥३॥ पृथक् विविधैर्दोषैर्द्वंद्वजा सन्निपातजा॥ असं
श्री वुपानाद्भवति पंचवमिर्नरे॥४॥ कदशनाज्जायते वान्याः अरुणता सां च लक्षणं॥ हृ
त्पार्श्वमूलं सोद्गारं तथा च हुपेनिलां छेणा वाताद्वमते मुखे वैरस्यताश्वसन्॥
श्यावास्यनेत्रमल्केदो रोमहर्षश्च वेपथुः॥५॥ एतैर्लिंगैस्तु विज्ञेया वाताच्छर्दिभि
षग्वरः॥ सपीतं हरितं सास्रं पिपासा भ्रमशोषणं॥६॥ संतापदाहं बहु हन्मोहश्च पैत्तिकी
छर्दिरुच्यते॥ तंद्रालस्यं समधुरं च वनं च सकफं वमेत्॥७॥ शाम्यतं पिच्छिलं चापि सा॥
वांतिः कफसंभवा॥ शूलप्राघारुचिस्वेदवैरस्यं धूमगंधता॥८॥ तोदो मूर्छा च प्रसे

आत्रे. दोजायतेसात्रिदोषजा॥आमजेम्लरोधार्तिपर्वभेदः क्लमोभ्रमः॥१०॥शोषःशिरोव्यथा
१८० क्लेदोनेत्रंगंभीरस्यछर्दितिं॥खल्लीचवेष्टनंचापिअजीर्णाज्जायतेवमिः॥११॥सापिस्नि
ग्धाचरूक्षाचद्विविधाजायतेवमिः॥गंभीरनेत्रोवमतेविगंधोवातिसार्यते॥१२॥
गात्रेखल्लूदरेशूलंतथाशोषोतिमूर्छता॥विकलांगोभ्रमंत्तंपश्यतेजगत्॥१३॥शि
रोर्तिर्वेपतेत्स्वर्थः करपादौहिमौपमौ॥एतैर्लिंगैःसमायुक्तांछर्दिंदूरेपरिसंजेत्॥
॥१४॥इतिछर्दिलक्षणानि॥सपंचमूलीक्वथितःकषायःससैंधवश्चामलकस्य
कल्कः॥काथंपिबेन्निमिश्रितपिप्पलीकंसवातछर्दिविनिवारणाय च॥१५॥हन्यात्क्षी
रंशर्करयानरस्यपित्तोद्भूतांवातिशीघ्रंनिहंति॥द्राक्षाचापिक्षीरदार्याविचूर्णंले
होवांतिसारघ्नेणापिहंति॥१६॥फलत्रिकंपुष्करकंवचाचतथामयाःसैंधवगुडेन॥ १८०॥
संर

चूर्णंविलिह्यात्कफवांतिहंस्यैनरस्यमूत्रेणयुतंचपीतं॥१७॥सटीपाव्येमयाशुं
ठीमागधीघृतसंयुता॥चूर्णंतक्रेणसंयुक्तंहंतिछर्दिंत्रिदोषजां॥१८॥रक्तशालसु
द्भवालाजामधुशर्करयान्विता॥ज्वरार्तस्यवमिंशीघ्रंनाशयत्येषमेमतं॥१९॥आ
मलक्यारसेनाथघृतंचंदनकंमधु॥गुटिकामलमानेनलेहोहंतिवमंध्रुवं॥
२०॥आम्रादाडिमनिर्यासमजाजीशर्करायुता॥सतैलंमाक्षकंवापिचत्वारःक
वलग्रहाः॥२१॥चतुर्ष्वेतेचकान्हंतिवातात्याद्धद्यजास्य॥त्रिकटुकरजनीद्व
यंविचूर्ण्यफलत्रिकंमगधांचयावशूकं॥समकृतमितिचूर्णमेतत्सरघाजाते
नहंतिवमिं॥२२॥सगुडंदाडिमंद्राक्षोपथ्यावानागरंगुडसंयुक्तं॥त्रिवृतानागर

आत्रे. मथवा गुडेन युक्ता वमिं हंति ॥२३॥ इति वातछर्दिचिकित्सा ॥ पर्यटं सगुडं काथ्य शी
१८१ तलं पाययेन्नरां वमिं हंति महाघोरां सपित्तां भ्रमसंयुतां ॥२४॥ आमलक्यारसे
नाथ घृष्टं चंदनकं मधु ॥ काकोली काकमाची च काथः शर्करयायुतः ॥२५॥ ला
जाशर्करसंयुक्तो हंति पित्तवमिं नरां ॥ मातुलुंगरसं चैव पथ्याशर्करयापुनः ॥२६॥
हंति कासं पित्तमवं वमिं शीघ्रं नियछति ॥ इक्षु पित्तवमिं घोरां सदाहभ्रमवा
हिनी ॥२७॥ तस्याः गूधपत्रा सोमधुशर्करायुतां क्षीरपानं प्रशस्तं वा मुस्ताशर्कर
यान्वितं ॥२८॥ इति पित्तछर्दिचिकित्सा ॥ जंवूकस्य प्रवालानि दाडिमामलकं १८१

तथा ॥ मधुनापेषितं पानं हन्यात्श्लेष्मवमिं नरां ॥२९॥ सर्जार्जुनौ धवकदंव
कंकोलचूर्णं शृंगी घना च सहितं सगुडं प्रदद्यात् ॥ श्लेष्मोद्भवं वमनमाशु नि
हंति पुंसां शुंठीकणाप्ययविडंगयुतो वलेह ॥३०॥ इति कफछर्दिचिकित्सा ॥ एला
दलानि गजकेशरकं त्वचं वा लामज्जकं वदरमज्जमनं प्रियंगुः ॥ स्याच्चंदनं स
मम घासमचूर्णितानां ॥ लिह्यात्सितासमं त्रिदोषवमिं जघान ॥ ३१ इत्यादि
चूर्णं ॥ ऊर्ध्वभागते दोषे विरेकश्च प्रशस्यते ॥ तेनयातमधो दोषं वमनं शमये
द्ध्रुवं ॥३२॥ अथवापि हि भागेन गतेषु मधुनाऽभयां ॥ क्रिमिजां च वमिं ज्ञात्वा का
र्या क्रिमिशमक्रिया ॥३३॥ व्रतजे व्रतजा कार्या त्वजीर्णे शोधनक्रिया ॥ न चोष्मं

नातिचाम्लं च लघुतालं घनेन च ॥२४॥ तंडुलीयक शाकं च नमयं कांजिकं मधुव
मिश्रोषेच क्वथितं पथ्या चात्र ज्वराधमे ॥२५॥ आरूक्षं शालिभक्तं च शतपुष्पा शतपु
ष्पा सवास्तुकं आढकीमुद्गयूषं वा दधिघृतगुडान्वितं ॥२६॥ शृंगारमंडकान्वाज्यं
व मोपथ्यं प्रशस्यते ॥ यथावलं यथाकालं यथारोगं यथानलं ॥२७॥ रोगीणां च तथा
दृष्ट्वा पथ्यानां समुपक्रमः ॥ दिवानिद्रां प्रयुंजीयात्क्षमोभ्वाशेति सारके ॥२८॥ हि
क्काशोषे तथाजीर्णे वमोत्क्लेदे यवापुनः ॥ न चोष्णतोयपानं च नातिभोजनमेव
तु ॥२९॥ दंतधावनकं क्लेयं वर्जयेद्वमनार्दित ॥४०॥ इत्यात्रेयभाषिते हारीतोत्तरे
छर्दिचिकित्साध्यायः ॥ अथाघ्रमाद्वलहाने र्छिदलाद्दुग्धसेवनात् ॥ शतपेवा १८२

ज्वरे जीर्णे द्वितीयाच्च तृतीयास्तथा ॥१॥ एभिः संकुपिता दोषा वातपित्तकफास्त्रयः ॥
चतुर्थी द्वितजा प्रोक्ता पंचमी द्वितजा स्मृता ॥२॥ अजीर्णाच्च तथा षष्ठी सप्तमी
रुद्वसेवनात् ॥ अष्टमी स्याज्ज्वरोत्पन्ना लद्वणानि यथाक्रमं ॥३॥ ह्लामः स्याद्वा
ष्पाताती दोषैस्त्रसंवेपथुः श्वसश्वातेनासाम वेतत्क्षमाविज्ञेया भिषजां वरः ॥४॥
शीततोयाभिलाषश्च भ्रमदाघौ प्रलापता मूर्छा च लोहिते नेत्रे तत्क्षमां पित्तो
त्थवां विदुः ॥५॥ निद्रा मधुरतालस्यं बलासोष्णभिलाषता ॥ प्रतिश्यायो गरी
स्यं च श्लेष्मणा जायते तृषा ॥६॥ हृच्छूलं वमनं दाघो भ्रमो वा शिरसो व्यथा वे
पथुश्चांगगौरवं च त्रिदोषप्रभवा तृषा ॥७॥ वक्त्रशोषो भवेज्जंभा शिरोर्तिगुरुता

आत्रे॰ दरेणअजीर्णेनाथमनुजेतृष्णांसंलक्षयेद्बुधः॥ पारसक्षयेपदा तृष्णातृदाक्षा
१८३ मः क्षुधातुरः॥ग्लानिशोषभ्रमश्वासदैन्यमाशुप्रवर्तते॥१०॥ क्षतक्षयेषुयात
ष्णातस्यांनानाभिनंदनं॥अन्याज्वरातुरेप्रोक्तातृष्णासाज्वरवेगजा॥११॥ अ
न्यातिसारमूलेवातृष्णाहेयाभिषग्वरः॥ तृष्णातिसारेवमनेदाहेमूर्छाभ्रमे
शोषे॥१२॥ त्रिदोषजाचयापुत्रतामसाध्यांविनिर्दिशेत्॥१३॥ इति तृष्णालक्ष
णानितृष्णांवातोद्भवांहंक्षासस्यतेसगुडंदधि॥ सगुडंवाम्नताक्वाथंपीत
वाततृषापहं॥१३॥ सुंठीमजाम्पासहम्पंगवेरांजलेनसौवर्चलयुक्तकल्कः॥पि
वोकषायंचसुशीतलंवावातोद्भवामाशुनिहंतितृष्णां॥१४॥ इतिवाततृष्णा १८३

चिकित्सा॥ कास्मर्यपद्मकोसीरंक्षुद्रामधुकचंदनं॥वालकंशर्करायुक्तंक्वा
थंपित्तज्वरापहं॥१५॥ वटोद्भवंरोध्रशिवासचंदनाः सदाडिमंतंडुलधाव
नेन॥पिबंसुशीतेनजलेनवापितृष्णांप्रवृद्धामपिहंतिसत्वरं॥१६॥ कुषमु
सलकंजालान्यग्रोधसप्ररोहकान्॥संचूर्णशर्करायुक्तागुटीतृष्णानिवा
रणी॥१७॥ द्राक्षोत्पलंसयष्टीकंशस्तंचेक्षुरसेनवा॥पित्तंपित्तोद्भवांतृष्णां
हंतिदाघंचपित्तजं॥१८॥ आकंठंशर्करायुक्तंक्षीरमुष्णंपिबेन्नरः॥वमनं
पी२ चतदाकुर्यात्हंतितृष्णांहिपित्तजां॥१९॥ लोष्ठंप्रतप्तंतोयेचनिर्वाप्यशीत
लीकृतं॥पिबतृष्णाविनाशायजलंवाचंदनान्वितं॥ इतिपित्ततृष्णाचिकि

पिबेत्स्याद्वकिपूर्वकं च =

त्वाङ्गं चाम्लकप्रवालानि तथा लाजाश्च चंदनं॥ धातकीकुसुमानि स्युः पिष्ट्वा सारवसं
युतं॥२१॥ श्लेष्मतृष्णापहो लेहो दाघमूर्छाभ्रमापहः॥ पिबेद्वाटिकसूपं च लाजाशर्करया
न्वितं॥२२॥ क्षीरपानं समरिचं जलं वा मरिचान्वितं॥ श्लेष्मतृष्णाविनाशाय पिबेत्कोल
कंपयः॥२३॥ इति श्लेष्मतृष्णाचिकित्सा॥ दुरालभापर्पटप्रियंगुकोलद्रुवंत्र्यूषणाकं
सकुष्ठक्वाथः सुशीतो मधुशर्करयायुक्तस्तृष्णां त्रिदोषप्रभवां निहंति॥२४॥ कोलदाडि
मवृक्षाम्लसारिवाः समशर्कराः॥ पथ्या दाडिमचूर्णं वा मातुलुंगरसान्वितं॥२५॥
इति त्रिदोषतृष्णाचिकित्सा॥ काष्ठपात्रे घृतं सम्यक् शीतलं सलिलं तथा मर्दितं
सहस्रवेलं तु तस्मान्नीयं तु पाययेत्॥२६॥ तालुशोषे घृतं तत्तु पाययेच्च भिषग्वरः १८४

तृष्णादाहभ्रमच्छर्दिशोषमूर्छां व्यपोहति॥२७॥ क्षतजां क्षयजां तृष्णां वारयेत्स्याम्बु
निश्चितं॥ दाडिमं कोलचुक्रिकावृक्षाम्लं चाम्लवेतसं॥२८॥ रसकं चैव पथ्या च पु
त्तं॥ तालुप्रलेपनं॥ वारयेत्साम्बुशोषं च तृष्णां हंति च सज्वरं॥२९॥ केशरं मातुलुंग
स्य पिष्टं तंडुलवारिणा॥ लिप्तं च मधुना तालुदाहशोषे सुखावहं॥३०॥ मधुशर्कर
या लेपं मुखशोषनिवारणं॥ पद्मकंदं समालिप्य शीतं शीतलवारिणा॥३१॥ तालु
शोषं निहंत्याम्बुजं चाम्रपल्लवानि च॥ चिंचा वा मातुलुंगं वा सौवीरं नागरा(
रिणा च॥३२॥ शोषार्तो पुरतो भक्ष्यं न देयं तस्य धीमता॥ दर्शनात्तस्य चास्ये च ला
लाप्रस्रवते भृशं॥३३॥ दंतेनास्य शोषं हंति तृष्णा वा पि नियच्छति॥ रक्तशाल्योदनं श

आत्रे. स्तंदधिशर्करयान्वितं ॥२४॥ भोजनेषु प्रशस्तं च नद्यारं कटुकं तथा ॥ छर्दितृष्णास्यशो
१८५ षेषु भ्रमे पानात्ययेपि च ॥२५॥ अतीसारे च दाहे च दिवाग्निद्रासुखावहा ॥ इत्यात्रेय
भाषिते हारितोत्तरे तृष्णातालुचिकित्साध्यायः ॥ वेगाभिघातातिनिरोधकेन क्षी
णाद्गताद्वात्तषितेन वापि विरुद्धमुक्तान्नविभक्षणेन दोषाः प्रवृद्धा जनयंति मू
र्छां पंचेंद्रियाणां संलग्नाः प्रत्येकं नाड्यो दश पंचेंद्रियाणां संहिता नाडिकाः
षष्टिसंख्यया ॥२॥ रुंधंति नाडिकाद्वारं तेन चित्तं हि मूर्छति ॥ सज्ञानाशो भवेत्ती
व्रं निश्चेष्टा भवते नरः ॥३॥ पतते काष्टवत्तूर्णं मोहो मूर्छा निगद्यते ॥ सापि द्विधा स
मुद्दिष्टा वातपित्तकफैस्त्रयः ॥४॥ शोणितादभिघातेन मद्येनाथ विशेणाच ॥२ १८५

षा पित्तं कोपयति महद्भक्तसमीरितं ॥५॥ संज्ञाप्रदीवल्पकं तेन मूर्छा मोहः प्रशस्य
ते ॥ कथयामि समासेन लक्षणानि पृथक्पृथक् ॥६॥ नीलं तु कृष्णारुणं पश्येत्तमः
प्रविशते क्षणात् ॥ कंपमार्दवतो ह्यासं क्षपोन प्रतिबुध्यति ॥७॥ वातेन मूर्छा भ
वति कार्श्यता कलुषास्यता ॥ नेत्रश्रावो व्यथा भवती चाध्मानं तु भवेत्क्षणं ॥८॥ पी
तं तु नीलहरितं तमः प्रविशते मृशं ॥ संतापश्च पिपासा च रक्ते पीते च लोचने ॥९॥
सस्वेदं च वपुश्चापि भ्रमः संभिन्नवर्चसः ॥ पित्तात्भवति मूर्छा त्वं जायते च शि
रोव्यथा ॥१०॥ धूमाकुला दिशः पश्येत्तमः स्पृश्यति वा पुरः ॥ कफाच्च मुत्क्लेनेत्र
त्वं मंदास्योंगे गुरुशीतता ॥११॥ चिरात्प्रबुध्यते त्यर्थं कंठे च घुर्घुरायते ह्लासो

आत्रे· मूर्छायेकफजे भवते चीवच दारुणा॥२२॥ सन्निपातादपस्मारो दृश्यते भिषजांवरः॥ स
१८६ प्राणिनं ह्यातपतिरक्ते नसहितोयदि॥२३॥ सप्राणघातं कुरुते नरंचाप्युतमोवृतः॥ रक्ते
गंधेन मूर्छति तेन मूर्छा शिरोव्यथा॥२४॥ कंपते नष्टचेष्टश्च तत्स्यते वमते श्ववाज्जा
यते मोहो मूर्छा वातेन निद्रादुर्मना॥२५॥ पित्तोत्तमाभवत्ति वै मनुजस्य मूपित्त
प्रभं वनभवं भ्रममेव पुंसां वातात्कफात्मकयुतामनुजस्यतं द्राचेतत्कफानिल
तमो भवते नरस्य॥२६॥ इति मूर्छालक्षणानि॥ स्वेदाभ्यंगमर्दनंचापि मूर्छा
शीतान्नपानव्यंजनानि स्यंपित्तशांत्यै॥ काषायपानमतमेवरमौप्रशास्तं श्लेष्मो
त्द्भवा विनिहिते भ्रममूर्छनांच॥२७॥ पाययेत्त्रिफलाक्वाथं शीतं शर्करयायुतं॥ दुरा १८६

लभां वानिः क्वाथ्यपाययेछर्करान्वितं॥२८॥ कणाकोलस्यमज्जा च केशरोसीरचं
दनं॥ पिष्ट्वा शीतांवुनाखंडं पानं हंति विमूर्छनं॥२९॥ नष्टचेष्टत्वमापन्ने नरे सा
चेतनक्रियां॥ संपीड्य नरश्चांगुष्ठं नासिकांच प्रपीडयेत्॥२०॥ दंतैर्वा संदशेद्वापि
शनैर्गात्रं प्रपीडयेत्॥ दाहयेच्च ललाटे तु पक्षे देशे च तालुके॥२१॥ एवं न सिद्ध्यति
चापि तदा चांदोलनं हितं॥ मूर्छातुरं विमलशीतजलेन सिंचन्संजीवयेछ्वस
नपिछकवीजनैस्तु॥ दोलाधितं हि विहितं मनुजस्य मूर्छा मोहं भ्रमंच हरते थम
दात्ययंच॥२२॥ मदात्ययेऽनलो मृते क्वथितं चाग्रतो दश॥ इति मूर्छा चिकित्सा॥
करंजवीजं सह सैंधवेन रसोनपत्रस्य रसंच पत्र॥ मार्कंच पथ्यां सहयावकेन पिष्टं

